E-ISSN-2584-2870 https://doi.org/10.65833/dbs.2026.327

केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः
देवभूमि-सौरभम्
Devabhūmisaurabham
E-ISSN 2584-2870

Vol 3 Issue 1 Jan-June 2026 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# नरोत्तमभट्टकृतलक्षणसङ्ग्रहस्थहेत्वाभासनिरूपणम्

**उर्मिला देवी**
**शोधच्छात्रा**
**(दर्शनविद्याशाखा)**
**केन्द्रीयसंस्कृतविश्वविद्यालयः,**
**श्रीरघुनाथकीर्तिपरिसरः,**
**देवप्रयागः, (उत्तराखण्डः)**
**दूरभाषसङ्ख्या -7807281959**
**urmilachutki959@gmail.com**

## शोधसारः(Abstract)

न्यायशास्त्रे अथवा न्यायवाक्ये हेतुः सुप्रधानं स्थानं अलङ्करोति । युक्तहेतुना साध्यसाधनं सम्भवति । हेतुः द्विधा भवति सद्धेतुः असद्धेतुश्च । व्याप्तिपक्षधर्मताविशिष्टः सद्धेतुः । यथा 'पर्वतो वह्निमान् धूमात्' इत्यत्र यत्र यत्र धूमः तत्र तत्राग्निः इति व्याप्तिः पर्वते वर्त्तते, अतः धूमरूपहेतुः सध्देतुः भवति । हेतोः व्याप्तिः न सम्भवति तत् असद्धेतुः । यथा 'पर्वतः धूमवान् वह्नेः' इत्यत्र वह्निरूपहेतुः असद्धेतुः । अत्र हेतोः यत्र यत्र वह्निः तत्र तत्र धूमः इति व्याप्तिः न भवति, अयोगोलके वह्निसत्वेऽपि धूमस्याभावात् । स एव दुष्टहेतुः इत्युच्यते । सद्धेतोः निरूपणावसरे अनुमान विजयार्थं तद्विपरीत असद्धेतोः निरूपणम् अपि आवश्यकम् । अतः अनुमाननिरूपणे दुष्टहेतुनिरूपणम् अथवा हेत्वाभासनिरूपणमावश्यकं भवति ।

हेत्वाभासशब्दश्च हेतोः आभासाः हेत्वाभासाः इति षष्ठीतत्पुरुषसमासाश्रयेण हेतुनिष्ठदोषाभिधायि हेतुवत् आभासन्ते इति उपमितसमासाश्रयेण दुष्टहेतुपरश्च दुष्टत्वञ्च दोषवत्वम् । न्यायभाष्ये

हेतुसामान्याद् हेतुवदाभासमानाः हेत्वाभासाः इति हेत्वाभासलक्षणमुच्यते । **'हेतुलक्षणरहिता हेतुवदाभासामाना हेत्वाभासाः'** इति भासर्वज्ञादयः ।

लक्षणेषु तर्काणां प्राधान्यं भवति । तर्कः दर्शनस्य विषयरूपेण ज्ञायते । दर्शनम् अर्थाद् यस्य शास्त्रस्य माध्यमेन यथार्थज्ञानं प्राप्यते तत् दर्शनम् इत्युच्यते । भौतिकदर्शने प्रवृत्ते सति भारतीयदर्शनं न केवलं देशे अपितु विदेशेष्वपि स्वस्य वर्चस्वं स्थापितवान् ।

**अहं कोऽस्मि ? अहं कुतः आगतवान् ? कुत्र गन्तव्यम् ? मम कर्तव्यं किम् ? कथम् अयं संसारः अस्तित्वं प्राप्तवान् ? अस्य कारणं किम् ?** एतादृशाः प्रश्नाः चिन्तनशीलस्य मनसि निरन्तरमुत्पद्यन्ते । एतेषां सर्वेषां प्रश्नानां समाधानं केवलं दर्शनमेव कर्तुं शक्नोति ।

भिन्न भिन्न दर्शनानां भिन्न भिन्न मतानि इति योगसिद्धम्, अन्यथा एकमेव दर्शनं स्यात् । यद्यपि सर्वेषां दर्शनानाम् अन्तिमं लक्ष्यं तु आत्यन्तिकदुःखनिवृत्त्येव तथापि भारतीयदर्शने सद्धेतुरिव असद्धेतोः हेत्वाभासस्य तत्त्वनिर्णयविजयप्रयोजकत्वं सुविदितं वर्त्तते विदुषाम्, अतैव तत्त्वचिन्तामणौ गङ्गेशोपाध्यायैः **"अथ हेत्वाभासाः तत्त्वनिर्णयविजयप्रयोजकत्वात् निरुप्यन्ते"** इत्युक्तम् अतः न्यायशास्त्रे प्रायशः सर्वेषु ग्रन्थेषु हेत्वाभासस्य सामान्यलक्षणम् आचार्यैः कृतं वर्त्तते । लक्षणसङ्ग्रहेऽपि नरोत्तमभट्टैः हेत्वाभासलक्षणं कृतम् ।

अतः नरोत्तमभट्टविरचिते लक्षणसङ्ग्रहे प्रतिपादितं हेत्वाभासस्वरूपनिरूपणं न्यायपरम्परायाः तर्कवैशद्यं प्रमाणशुद्धिं च सम्यक् प्रकाशयति । एतदध्ययनेन युक्तायुक्तविवेकस्य परिष्कारः, तर्कपद्धतेः सुदृढीकरणं तथा दार्शनिकचिन्तनस्य प्रौढता च सुस्पष्टतया अवगम्यते । नरोत्तमभट्टस्य एषा प्रस्तुतिर्नव्यन्यायतर्कपरम्परायां विशिष्टं योगदानं वहति इति निष्कर्षतः प्रतिपद्यते । तस्माद् हेत्वाभासविमर्शः केवलं तर्कदोषपरिज्ञानस्य साधनं न भवति, अपितु यथार्थज्ञानसिद्धेः अपि महत्त्वपूर्णमाधारत्वेन प्रतिष्ठां भजते ।

**मुख्यशब्दाः - ( keywords)** हेत्वाभासः, लक्षणम्, अतिव्याप्तिः, अव्याप्तिः, व्यभिचारः, अनुमितिः, यथार्थज्ञानम्, प्रतिबन्धकः, यथार्थः, प्रतियोगिता, व्यवहारापत्तिः, पक्षः ।

**उद्देश्यानि - (Objectives)**

**"प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते"** अस्याः उक्तेरनुसारं प्रयोजनरहिते कस्मिन्नपि कर्मणि मन्दजनोऽपि संलग्नो न भवति। अतः शोधपत्रमिदं निम्नलिखितानि उद्देश्यानि अधिकृत्य विधास्यते।

१. नरोत्तमभट्टकृतस्य लक्षणसङ्ग्रहग्रन्थस्य स्वरूपं तथा तस्य न्यायशास्त्रीयमहत्त्वं परिशीलयितुम्।

२. लक्षणसङ्ग्रहे प्रतिपादितानां हेत्वाभासानां स्वरूपं, लक्षणं तथा तेषां भेदान् विशदीकर्तुम्।

३. हेत्वाभासविवेचने नरोत्तमभट्टस्य तर्कपद्धतेः वैशिष्ट्यं निरूपयितुम्।

४. न्यायदर्शने हेत्वाभासस्य स्थानं तथा तस्य ज्ञानमीमांसात्मकमहत्त्वं प्रकाशयितुम्।

५. लक्षणसङ्ग्रहस्थहेत्वाभासनिरूपणस्य पूर्वन्यायग्रन्थैः सह तुलनात्मकमध्ययनं कर्तुम्।

६. तर्कदोषपरिज्ञानद्वारा यथार्थानुमाननिर्माणे हेत्वाभासज्ञानस्य उपादेयतां प्रदर्शयितुम्।

७. नरोत्तमभट्टस्य हेत्वाभासविचारस्य समकालीनतर्कचिन्तने प्रासङ्गिकतां मूल्याङ्कयितुम्।

८. लक्षणसङ्ग्रहस्थहेत्वाभासप्रकरणस्य सम्यगनुशीलनेन न्यायदर्शनस्य तर्कवैभवं उद्घाटयितुम्।

**शोधपत्रम् - (Research Paper)**

**हेत्वाभासाः -**

न्यायशास्त्रे पदार्थतत्त्वानां निश्चये अनुमानस्य उपयोगित्वम्, तच्चानुमानं लिङ्ग-परामर्शरूपम्। स च परामर्शोः व्याप्तिविशिष्टपक्षधर्मताज्ञानस्वरूपम्। तस्मिश्च परामर्शे विषेशणत्वेन व्याप्तिज्ञानं

पक्षधर्मताज्ञानञ्च कारणम् । तेन परामर्शेण पक्षविशेष्यक-साध्यविधेयिकानुमिति जायते अनुमितौ च पक्षज्ञानं कारणम्, एवञ्च व्याप्तिविशिष्ट पक्षधर्मताज्ञानस्वरूपपरामर्शजन्या या अनुमितिः तस्या अनुमित्या पक्षे साध्यवत्तायाः निश्चये जायते।

इत्थं प्रकारेण पक्षे साध्यवत्ता निश्चय साधने लिङ्गपरामर्शस्वरूपस्य अनुमानस्य अथवा व्याप्तिविशिष्टहेतोः पक्षे साध्यवत्ता निश्चयस्य प्रयोजकता भवति। यथा व्याप्तिपक्षधर्मताविशिष्टायाः हेतुः सद्हेतुः साध्यवत्ता निश्चये प्रयोजकः तथैव व्याप्तिपक्षधर्मत्वाभावविशिष्टो हेतुः दुष्टहेतुरपि साध्यतानिश्चये प्रयोजकः । तत्त्वनिर्णयः एवं विजयप्रयोजकता यथा सद्हेतौ विद्यते तथैव दुष्टहेतावपि अर्थात् हेत्वाभासज्ञानेऽपि आवश्यकम्।

हेत्वाभासपदञ्च हेतुवद् आभासन्ते इति हेत्वाभासाः इति व्युत्पत्त्या हेत्वाभासपदं दुष्टहेतुपरम्। स च दुष्टहेतवः सव्यभिचारविरूद्धसत्प्रतिपक्षासिद्धबाधितभेदात् पञ्चविधः । एवं हेतोः आभासाः इति हेत्वाभासाः इत्यन्यविधव्युत्पत्त्या हेत्वाभासपदं हेतुदोषपरम् । स चापि हेत्वाभासाः व्यभिचारविरोधसत्प्रतिपक्षासिद्धिबाधभेदेन पंचविधः। चिन्तामणिकारेण गंगेशोपाध्यायेन हेत्वाभास्य त्रीणि लक्षणानि प्रतिपादितानि, तानि इत्थं प्रकारेण- “तत्रानुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविशयत्वम्”[1] । **“यद्विषयकत्वेन लिंगज्ञान-स्यानुमितिप्रतिबन्धकत्वं तत्त्वं”**[2] ज्ञायमानं सदनुमितिप्रतिबन्धकं यत् तत्त्वं वा हेत्वाभासास्तत्त्वम्[3]।

भारतीयदर्शने सद्धेतुरिव असद्धेतोः हेत्वाभासस्य तत्त्वनिर्णयविजयप्रयोजकत्वं सुविदितं वर्तते विदुषाम्, अतैव तत्त्वचिन्तामणौ गङ्गेशोपाध्यायैः **“अथ हेत्वाभासाः तत्त्वनिर्णयविजयप्रयोजकत्वात् निरुप्यन्ते”**[4] इत्युक्तम् अतः न्यायशास्त्रे प्रायशः सर्वेषु ग्रन्थेषु हेत्वाभासस्य सामान्यलक्षणम् आचार्यैः

[1] सामान्यनिरुक्तिः गङ्गाव्याख्यासंवलितः पृ०सं० 9.

[2] सामान्यनिरुक्तिः प्रकरणं चन्द्रकलाकलविलाससंवलितं पृ०सं० 87 श्री साधु बेला आश्रम

[3] सामान्यनिरुक्ति चन्द्रकलाकलाविलाससंवलितं पृ०सं० 245 श्री साधु वेला आश्रम

[4] तत्वचिन्तामणि: पृ० सं० २५६

कृतं वर्त्तते। लक्षणसङ्ग्रहेऽपि नरोत्तमभट्टैः हेत्वाभासलक्षणं कृतम्। किन्तु पूर्वलक्षणापेक्षया अस्मिन् लक्षणे वैलक्षण्यं वर्त्तते। नरोत्तमभट्टैः हेत्वाभाससामान्यलक्षणं द्विविधं कृतम्।

**प्रथमलक्षणम्—**

**"एतादृशरुपशून्यहेतुवद् आभासमाना: हेत्वाभासाः"**[5] । इदं लक्षणं प्रसिद्देषु नव्यन्याय प्राचीनन्याय ग्रन्थेषु कुत्रापि न प्राप्यते, अतः पूर्व लक्षणापेक्षया अस्य लक्षणस्य वैलक्षण्यं वर्त्तते । किञ्च अस्मिन् लक्षणे यल्लाघवं वर्त्तते तन्मया अनुलक्षणमेव व्याख्यास्यते।

**द्वित्तीयलक्षणम्-**

**"अनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वं हेत्वाभासत्वम्"**[6]। यद्यपि तर्कसङ्ग्रहे एतल्लक्षणार्थतात्पर्यकं लक्षणं अन्नमभट्टै: निगदितं वर्त्तते । तच्च **अनुमितितत्करणान्यतरज्ञानप्रतिबन्धकयथार्थज्ञानविषयत्वं हेत्वाभासत्वम्,** तथाहि लक्षणस्य परिष्कृतं रूपं भवति **अनुमितितत्करणान्यतरज्ञाननिष्ठप्रतिबध्यतानिरुपितप्रतिबन्धकतावत् यथार्थज्ञानविषयत्वं हेत्वाभासत्वम्** [7]। लक्षणसमन्वयस्तु इत्थं भवति तद् वत्ता बुद्धिं प्रति तद् भाववत्ता बुद्धेः प्रतिबन्धकत्वात् **ह्रदो वह्निमान्** इति अनुमितिं प्रति ह्रदः वह्न्यभाववान् इति निश्चयस्य प्रतिबन्धकत्वेन तद् विषयत्वस्य वह्नयभाववत् ह्रदेः सत्वात् भवति बाधरुपे हेत्वाभासे हेत्वाभाससामान्यलक्षणसमन्वयः व्यभिचारादौ लक्षणसमन्वयस्तु व्याप्तिज्ञाननिष्ठप्रतिबध्यतानिरुपितप्रतिबन्धकतावत्यथार्थज्ञानविषयत्वेन बोध्यम्, तथाहि **पर्वतो धूमवान् वह्नेः** इत्यादौ धूमाभावाधिकरणनिरुपित वृत्तित्वभाववान् वह्निः इत्याकारक

---

[5] लक्षणसङ्ग्रह: पृ०सं ६७
[6] तर्कसङ्ग्रह: पृ० सं० ४७
[7] तर्कसङ्ग्रह: पृ० सं० ४८

व्याप्तिज्ञानं प्रति वह्निर्धूमव्यभिचारी अर्थात् धूमाभावाधिकरणनिरुपित वृत्तित्ववान् वह्निः इत्याकारकस्य यथार्थज्ञानस्य तद्भावता मुद्रया प्रतिबन्धकत्वात् , तद्विषयत्वस्य धूमाभाववत् वृत्ति वह्नि इति व्यभिचारे असत्वात् भवति लक्षणसमन्वयः।

नरोत्तमभट्टैः यल्लक्षणं निगदितं वर्त्तते अनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वम् [8]इति अस्यापि समन्वयः पूर्ववद् बोध्यम्। अत्र इदं विचार्यते यल्लक्षणघटकानुमितिपदेन नरोत्तमभट्टेन कः अर्थः विवक्षितः यदि अनुमितिपदेन पक्षः साध्यभाववान् इत्याकारकानुमितिः विवक्षिता तर्हि अनुमितिप्रतिबन्धक यथार्थज्ञानविषयत्वस्य साध्याभाववदरुपे पक्षरुपे बाधे सत्वेऽपि व्यभिचारादौ लक्षणस्य अगमनात् अव्याप्तिः स्यात्। अस्याः अव्याप्तेः वारणाय यदि अनुमिति पदस्य तत्कारणज्ञाने जहद्लक्षणा अङ्गीक्रियते तदा लक्षणस्वरुपं भवति अनुमिति कारणज्ञानप्रतिबन्धकयथार्थज्ञानविषयत्वं तथा च व्यभिचारादौ लक्षणसमन्वयेसत्यपि बाधे लक्षणसमन्वयः न स्यात् यतोहि बाधज्ञानं न अनुमितिकारणज्ञानं प्रति बन्धनाति, अपितु तदभाववता मुद्रया साक्षातअनुमितिमेव प्रतिबधनाति। अतः बाधेः अव्याप्तिः, अस्याः अव्याप्तेः वारणाय अनुमिति पदस्य अजहद्लक्षणया अनुमिति तत्कारणज्ञानान्यतरपरत्वं स्वीकरिष्यते। तावतापि न दोष निस्तारः। तथाहि ह्रदः वह्निमान् पर्वतश्च तथा इत्याकारक समूहालम्बनात्मिका अनुमितिं प्रति ह्रदः वह्निभाववान् इत्याकारकयथार्थज्ञानस्य प्रतिबन्धकारकत्वात् तद् विषयत्वस्य पर्वतो वह्निमान् इत्यनुमितौ वह्निभाववद् ह्रदस्य दोषस्यापत्तिः स्यात्, अतः अनुमिति पदस्य अत्र लक्षणे पारिभाषिकानुमितिपरत्वं वक्तव्यं साच अनुमितिः पक्षः साध्यवान् साध्यव्याप्यहेतुमानश्च इत्याकारकानुमितिः।

अत्र लक्षणे यदि अनुमितिपदेन पारिभाषिकानुमितिः पक्षः साध्यवान् साध्यव्याप्यहेतुमानश्च गृह्यते, तदा लक्षणस्य स्वरुपं भवति , पक्षः साध्यवान् साध्यव्याप्यहेतुमानश्च

---

[8] लक्षणसङ्ग्रहः पृ० सं० ८०

इत्याकारकानुमितिनिष्ठ प्रतिबध्यतानिरुपित प्रतिबन्धकतावत् यथार्थज्ञानविषयत्वम् हेत्वाभासत्वम् , तथा च पक्षः साध्यवान् इति अंशे बाधबुद्धे प्रतिबन्धकत्वात्, साध्यव्याप्यहेतुमान पक्षः इति अंशे व्यभिचारादि ज्ञानस्य प्रतिबन्धकत्वात् तद्विषयत्वस्य क्रमशः बाधे व्यभिचारे च सत्वात् भवति उभयत्र लक्षण समन्वयः। प्रथमं यल्लक्षणं निगदितं तस्य अर्थो भवति **व्याप्तिपक्षधर्मताविरहविशिष्टःहेतुः असद्हेतुः ।** अयं असद्हेतुरेव हेत्वाभासपदेन विवक्षितो वर्तते। अस्मिन लक्षणे अनुमिति पदस्य अप्रवेशात् पूर्वोक्त क्लेशो नास्ति, तथापि कः हेत्वाभासः? कस्य प्रतिबन्धकः ? इति ज्ञानं सुस्पष्टतया न भवति, इति कृत्वा नरोत्तमभट्टैः पूर्वोक्तं द्वितीयं हेत्वाभासलक्षणं निगदितम्।

✓ **लक्षणघटकदलसार्थक्यविचाराः -**

**अनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वं हेत्वाभासत्वम्**[9] इति लक्षणे यदि अनुमिति पदं न दीयेत, तथा सति लक्षणस्वरूपं भवति **प्रतिबन्धकयथार्थज्ञानविषयत्वं हेत्वाभासत्वं** तथा च 'पर्वतो वह्निमान्' इत्यनुमितौ घटाभाववत् भूतलम् इत्यस्यापि दोषतापत्ति: स्यात्,

तथाहि घटवद्भूतलम् इति ज्ञानं प्रति घटाभाववद् भूतलम् इति यथार्थज्ञानं प्रतिबन्धकं वर्तते। अतस्तदविषयत्वस्य घटाभाववद् भूतले सत्वात् अयमपि हेत्वाभासः स्यात्, तद् वारणाय लक्षणे अनुमिति पदं दातव्यम्। दत्ते च अनुमिति पदे अनुमिति पदेन प्रकृतानुमितिरेव विवक्षिता इति कृत्वा पर्वतो वह्निमान् इति अनुमितिरेव गृह्यते तादृशानुमितिं प्रति घटाभाववत् भूतलम् इति यथार्थ ज्ञानस्य प्रतिबन्धकत्वं नास्ति अतः न दोषः , यदि अत्र लक्षणे यथार्थपदं न दीयेत तथा सति पर्वतो वह्निमान् इत्यनुमितिं प्रति पर्वतः वह्न्यभाववान् इत्याकारक बाधभ्रमस्य प्रतिबन्धकत्वात् तद्विषयत्वस्य वह्न्यभाववत् पर्वते सत्वात् पर्वतोवह्निमान् इत्यनुमितौ वह्नयभाववद् पर्वतस्य दोषतापत्तिः स्यात्

[9] लक्षणसङ्ग्रहः पृ० सं० ९८

तथा च धूमरुपे सद्धेतौ: हेत्वाभासस्य व्यवहारापत्तिः । अतः तद्वारणाय लक्षणे यथार्थपदं दातव्यं, तथा च बाधभ्रमस्य याथार्थ्याभावात् न वह्नयभाववत् पर्वते अतिव्याप्तिः ।

**शोधविधि – (Research methodology)**

प्रस्तुतस्य "नरोत्तमभट्टकृतलक्षणसङ्ग्रहस्थहेत्वाभासनिरूपणम्" इत्यस्य शोधपत्रस्य सम्पादने मुख्यतया वर्णनात्मक-विश्लेषणात्मक (Descriptive and Analytical) शोधविधेः आश्रयणं कृतम् । अस्मिन् शोधे नरोत्तमभट्टविरचितस्य लक्षणसङ्ग्रहग्रन्थस्य मूलपाठस्य सूक्ष्मतया अध्ययनं कृत्वा तत्र प्रतिपादितानां हेत्वाभासानां स्वरूपं, लक्षणं, भेदाश्च विश्लेषिताः । विषयस्य स्पष्टतायै न्यायसूत्रभाष्यादीनां तथा अन्येषां न्यायग्रन्थानामपि तुलनात्मकदृष्ट्या परिशीलनं कृतम् । तदनन्तरं प्राप्तसामग्रीणां तर्कसम्मतं विश्लेषणं कृत्वा निष्कर्षाः सम्पादिताः । अतः अस्य शोधस्य आधारः मुख्यतया ग्रन्थानुशीलनं, तुलनात्मकाध्ययनं तथा विश्लेषणात्मकपद्धतिश्च वर्तते ।

**निषकर्षः- (conclusion)**

अस्मिन् शोधपत्रे नरोत्तमभट्टविरचिते लक्षणसङ्ग्रहे प्रतिपादितस्य हेत्वाभासतत्त्वस्य सम्यगनुशीलनं कृतम् । अध्ययनादिदं स्पष्टं भवति यत् नरोत्तमभट्टेन हेत्वाभासानां स्वरूपं, तेषां लक्षणं, तर्कदोषरूपता तथा यथार्थानुमानजनने तेषां बाधकत्वं सुस्पष्टतया निरूपितम् । हेत्वाभासविवेचनस्य माध्यमेन सः साध्वसाधुहेत्वोर्विवेकं प्रतिपादयन् न्यायशास्त्रस्य तर्कवैशद्यं सम्यगुद्भासयति ।

तथैव हेत्वाभासज्ञानं केवलं तर्कदोषपरिज्ञानस्य साधनं न भवति, अपितु यथार्थज्ञानसिद्धये सम्यगनुमाननिर्माणाय च अनिवार्यमाधारत्वेन प्रतिष्ठितम् । नरोत्तमभट्टस्य प्रस्तुतीकरणे प्राचीनन्यायपरम्परायाः गाम्भीर्यं, तर्कशास्त्रस्य सूक्ष्मता तथा दार्शनिकचिन्तनस्य प्रौढता च सुस्पष्टतया परिलक्ष्यते। अतः लक्षणसङ्ग्रहस्थहेत्वाभासनिरूपणम् न्यायशास्त्रे तर्कदोषमीमांसायाः एकं महत्त्वपूर्णं प्रामाणिकं च योगदानमिति निष्कर्षतः प्रतिपद्यते।

अनेन स्पष्टतया ज्ञायते यत् लक्षणसङ्ग्रहः न्यायवैशेषिकपरम्परायां लक्षणमीमांसायाः एकः विशिष्टः प्रामाणिकश्च ग्रन्थः वर्तते। ग्रन्थकारेण नानाशास्त्रेषु प्रतिपादितानां पदार्थानां तत्त्वानां च लक्षणानि समाहृत्य सुव्यवस्थितरूपेण निरूपितानि, येन शास्त्राध्येतॄणां तत्त्वावबोधः सुकरः सञ्जातः।

उदयनाचार्यप्रणीतलक्षणावल्याः परम्परामनुसृत्य नरोत्तमभट्टेन लक्षणसाहित्यस्य समृद्धये महदुपकारकं कार्यं कृतम्। विशेषतश्च न्यायसूत्रप्रसिद्धानां षोडशपदार्थानां सम्यग्विवेचनपूर्वकं तेषां लक्षणानां सङ्ग्रहः कृतः, यः तस्य पाण्डित्यं शास्त्रनिष्ठां च सम्यक् प्रकाशयति।

अतः निष्कर्षतः प्रतिपद्यते यत् लक्षणसङ्ग्रहः केवलं लक्षणसङ्कलनपरकः ग्रन्थो नास्ति, अपितु न्यायतर्कपद्धतेः सूक्ष्मतत्त्वानां, शास्त्रीयविमर्शपरम्परायाश्च गाम्भीर्यस्य द्योतकः महत्त्वपूर्णश्च ग्रन्थः अस्ति। न्यायदर्शनस्य अध्ययन-अध्यापन-शोधपरम्परायां अस्य ग्रन्थस्य उपादेयता अद्यापि अक्षुण्णा वर्तते, तथा च लक्षणमीमांसाक्षेत्रे अस्य स्थानं सर्वथा विशिष्टमिति निर्विवादं सिद्धम्।

**सन्दर्भग्रन्थसूची**


१) न्यायकुसुमाञ्जलिः, श्री उदयनाचार्यः, चौखम्बा विद्याभवन, २००५

२) न्यायदर्शनम्, महर्षिः गौतमः, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली २००९

३) वैशेषिकदर्शनम्, महर्षिः कणादः, विजयकुमार गोविन्दराम हासानन्द, २०१०

४) न्यायकोशः, भीमाचार्य झलिकिकार, चौखम्बा सुरभारती प्रकाशन, २०११

५) कारिकावली मुक्तावली दिनकरी राजीवोल्लाससमन्विता, श्री एन्. एस. रामानुज ताताचार्य, श्री श्री श्री महालक्ष्मी मातृभुतेश्वरर् ट्रस्ट, चेन्नै, २०१२

६) न्यायप्रवेशः, डॉ. नवीनहोळळः, राष्ट्रियसंस्कृतसंस्थानम्।

७) पदवाक्यरत्नाकरः, गोकुलनाथ उपाध्यायः, सम्पूर्णानन्दसंस्कृत विश्वविद्यालयः-वाराणसी, १९९८

८) न्यायतात्पर्यदीपिका, भट्टवागीश्वरः, गङ्गानाथझा केन्द्रीयसंस्कृतविद्यापीठम् इलाहाबाद, १९७९

९) न्यायवार्तिकम्, श्रीमद्भरद्वाज उद्योतकरः, चौखम्बा संस्कृत भवन, वाराणसी, वि.सं. १९१६

१०) न्यायत्रविवरणम्, गम्भीरवंशजः, प्राच्यविद्यासंशोधनालयः, मैसूरम्, १९९२

११) तत्त्वचिन्तामणिः, म. म. श्रीगङ्गेशोपाध्यायः, राष्ट्रियसंस्कृतविद्यापीठम् तिरुपतिः, १९९९

१२) तर्कभाषा केशवमिश्रः, चौखम्बासुरभारतीप्रकाशन, २००३

१३) न्यायसारः, श्रीभासर्वज्ञः, संजयप्रकाशनम्, दिल्ली-२००५

१४) शक्तिवादः, गदाधरभट्टाचार्यः, संस्कृतपरिषद् उस्मानिया विश्वविद्यालयः, हैदराबाद, २००९

१५) न्यायकुसुमाञ्जलिः, उदयनाचार्यः, चौखम्बासुरभारतीप्रकाशन, १९९७

१६) प्रमाणमञ्जरी, ब्रह्मचारिणी गीता बनर्जी, चौखम्बासुरभारतीप्रकाशन, २००९

१७) दर्शनशास्त्रस्येतिहासः, डॉ. शशिबालागौडः, चौखम्बासुरभारतीप्रकाशन, २०१२

१८) तत्त्वचिन्तामणिः माथुरी, श्रीमथुरानाथतर्कवागीशः, चौखम्बा, २०१०

१९) आकांक्षावादः, श्रीरघुदेवभट्टाचार्यः, सम्पूर्णानन्द संस्कृतविश्वविद्यालयः, २००१

२०) न्यायसिद्धान्तमुक्तावली (किरणावली टीका), प० श्रीकृष्णवल्लभाचार्यः, चौखम्बा संस्कृत संस्थानम्, २०११

२१) तर्कसंग्रह विद्याधरी टीका, देवदत्तशर्माः समर्थ मिडिया सेंटर, २०१४

२२) व्युत्पत्तिवादः (आदर्श सहितः), गदाधरभट्टाचार्यः, तिरुपति, २०१२

२३) व्युत्पत्तिवादः (विद्वन् मनोरमा सहितः), गदाधरभट्टाचार्यः, देहली

२४) न्यायकोशः, महमहोपाध्याय भीमाचार्यः, चौखम्बा सुरभारती प्रकाशनम्, २०११

२५)  तर्कसङ्ग्रहः दीपिका, अन्नंभट्टः, भारतीय विद्या संस्थान, २००२

२६) न्यायसिद्धान्तमुक्तावली टीका दिनकरी, महादेवभट्टः, मोतीलाल बनारसीदास । २००५